# ॥ वाल्मीकि रामायण॥

## ५ सुन्दरकाण्ड

### अध्याय ३६

ततः स कपिशार्दूलस्तेन वाक्येन हर्षितः ।
सीतामुवाच तच्छ्रुत्वा वाक्यं वाक्यविशारदः ॥१॥

युक्तरूपं त्वया देवि भाषितं शुभदर्शने ।
सदृशं स्त्रीस्वभावस्य साध्वीनां विनयस्य च ॥२॥

स्त्रीत्वं न तु समर्थं हि सागरं व्यतिवर्तितुम् ।
मामधिष्ठाय विस्तीर्णं शतयोजनमायतम् ॥३॥

द्वितीयं कारणं यच्च ब्रवीषि विनयान्विते ।
रामादन्यस्य नार्हामि संस्पर्शमिति जानकि ॥४॥

एतत्ते देवि सदृशं पत्न्यास्तस्य महात्मनः ।
का ह्यन्या त्वामृते देवि ब्रूयाद्वचनमीदृशम् ॥५॥

श्रोष्यते चैव काकुत्स्थः सर्वं निरवशेषतः ।
चेष्टितं यत्त्वया देवि भाषितं मम चाग्रतः ॥६॥

कारणैर्बहुभिर्देवि राम प्रियचिकीर्षया ।
स्नेहप्रस्कन्नमनसा मयैतत्समुदीरितम् ॥७॥

लङ्काया दुष्प्रवेशत्वाद्दुस्तरत्वान्महोदधेः ।
सामर्थ्यादात्मनश्चैव मयैतत्समुदाहृतम् ॥८॥

इच्छामि त्वां समानेतुमद्यैव रघुबन्धुना ।
गुरुस्नेहेन भक्त्या च नान्यथा तदुदाहृतम् ॥९॥

यदि नोत्सहसे यातुं मया सार्धमनिन्दिते ।
अभिज्ञानं प्रयच्छ त्वं जानीयाद्राघवो हि यत् ॥१०॥

एवमुक्ता हनुमता सीता सुरसुतोपमा ।
उवाच वचनं मन्दं बाष्पप्रग्रथिताक्षरम् ॥११॥

इदं श्रेष्ठमभिज्ञानं ब्रूयास्त्वं तु मम प्रियम् ।
शैलस्य चित्रकूटस्य पादे पूर्वोत्तरे तदा ॥१२॥

तापसाश्रमवासिन्याः प्राज्यमूलफलोदके ।
तस्मिन्सिद्धाश्रमे देशे मन्दाकिन्या अदूरतः ॥१३॥

तस्योपवनषण्डेषु नानापुष्पसुगन्धिषु ।
विहृत्य सलिलक्लिन्ना तवाङ्के समुपाविशम् ॥१४॥

पर्यायेण प्रसुप्तश्च ममाङ्के भरताग्रजः ॥१५॥

ततो मांससमायुक्तो वायसः पर्यतुण्डयत् ।
तमहं लोष्टमुद्यम्य वारयामि स्म वायसं ॥१६॥

दारयन्स च मां काकस्तत्रैव परिलीयते ।
न चाप्युपरमन्मांसाद्भक्षार्थी बलिभोजनः ॥१७॥

उत्कर्षन्त्यां च रशनां क्रुद्धायां मयि पक्षिणे ।
स्रंसमाने च वसने ततो दृष्टा त्वया ह्यहम् ॥१८॥

त्वया विहसिता चाहं क्रुद्धा संलज्जिता तदा ।
भक्ष्य गृद्धेन कालेन दारिता त्वामुपागता ॥१९॥

आसीनस्य च ते श्रान्ता पुनरुत्सङ्गमाविशम् ।
क्रुध्यन्ती च प्रहृष्टेन त्वयाहं परिसान्त्विता ॥२०॥

बाष्पपूर्णमुखी मन्दं चक्षुषी परिमार्जती ।
लक्षिताहं त्वया नाथ वायसेन प्रकोपिता ॥२१॥

आशीविष इव क्रुद्धः श्वसान्वाक्यमभाषथाः ।
केन ते नागनासोरु विक्षतं वै स्तनान्तरम् ।
कः क्रीडति सरोषेण पञ्चवक्त्रेण भोगिना ॥२२॥

वीक्षमाणस्ततस्तं वै वायसं समवैक्षथाः ।
नखैः सरुधिरैस्तीक्ष्णैर्मामेवाभिमुखं स्थितम् ॥२३॥

पुत्रः किल स शक्रस्य वायसः पततां वरः ।
धरान्तरचरः शीघ्रं पवनस्य गतौ समः ॥२४॥

ततस्तस्मिन्महाबाहुः कोपसंवर्तितेक्षणः ।
वायसे कृतवान्क्रूरां मतिं मतिमतां वर ॥२५॥

स दर्भसंस्तराद्गृह्य ब्रह्मणोऽस्त्रेण योजयः ।

स दीप्त इव कालाग्निर्जज्वालाभिमुखो द्विजम् ॥ २६ ॥

चिक्षेपिथ प्रदीप्तां तामिषीकां वायसं प्रति ।
अनुसृष्टस्तदा कालो जगाम विविधां गतिम् ।
त्राणकाम इमं लोकं सर्वं वै विचचार ह ॥ २७ ॥

स पित्रा च परित्यक्तः सुरैः सर्वैर्महर्षिभिः ।
त्रींल्लोकान्सम्परिक्रम्य त्वामेव शरणं गतः ॥ २८ ॥

तं त्वं निपतितं भूमौ शरण्यः शरणागतम् ।
वधार्हमपि काकुत्स्थ कृपया पर्यपालयः ।
न शर्म लब्ध्वा लोकेषु त्वामेव शरणं गतः ॥ २९ ॥

परिद्यूनं विषण्णं च स त्वमायान्तमुक्तवान् ।
मोघं कर्तुं न शक्यं तु ब्राह्ममस्त्रं तदुच्यताम् ॥ ३० ॥

ततस्तस्याक्षि काकस्य हिनस्ति स्म स दक्षिणम् ॥ ३१ ॥

स ते तदा नमस्कृत्वा राज्ञे दशरथाय च ।
त्वया वीर विसृष्टस्तु प्रतिपेदे स्वमालयम् ॥ ३२ ॥

मत्कृते काकमात्रेऽपि ब्रह्मास्त्रं समुदीरितम् ।
कस्माद्यो मां हरत्त्वत्तः क्षमसे तं महीपते ॥ ३३ ॥

स कुरुष्व महोत्साहं कृपां मयि नरर्षभ ।
आनृशंस्यं परो धर्मस्त्वत्त एव मया श्रुतः ॥ ३४ ॥

जानामि त्वां महावीर्यं महोत्साहं महाबलम् ।
अपारपारमक्षोभ्यं गाम्भीर्यात्सागरोपमम् ।
भर्तारं ससमुद्राया धरण्या वासवोपमम् ॥ ३५ ॥

एवमस्त्रविदां श्रेष्ठः सत्त्ववान्बलवानपि ।
किमर्थमस्त्रं रक्षःसु न योजयसि राघव ॥ ३६ ॥

न नागा नापि गन्धर्वा नासुरा न मरुद्गणाः ।
रामस्य समरे वेगं शक्ताः प्रति समाधितुम् ॥ ३७ ॥

तस्या वीर्यवतः कश्चिद्यद्यस्ति मयि सम्भ्रमः ।
किमर्थं न शरैस्तीक्ष्णैः क्षयं नयति राक्षसान् ॥ ३८ ॥

भ्रातुरादेशमादाय लक्ष्मणो वा परन्तपः ।
कस्य हेतोर्न मां वीरः परित्राति महाबलः ॥ ३९ ॥

यदि तौ पुरुषव्याघ्रौ वाय्विन्द्रसमतेजसौ ।
सुराणामपि दुर्धर्षौ किमर्थं मामुपेक्षतः ॥ ४० ॥

ममैव दुष्कृतं किं चिन्महदस्ति न संशयः ।
समर्थावपि तौ यन्मां नावेक्षेते परन्तपौ ॥ ४१ ॥

कौसल्या लोकभर्तारं सुषुवे यं मनस्विनी ।
तं ममार्थे सुखं पृच्छ शिरसा चाभिवादय ॥ ४२ ॥

स्रजश्च सर्वरत्नानि प्रिया याश्च वराङ्गनाः ।
ऐश्वर्यं च विशालायां पृथिव्याम् अपि दुर्लभम् ॥ ४३ ॥

पितरं मातरं चैव संमान्याभिप्रसाद्य च ।
अनुप्रव्रजितो रामं सुमित्रा येन सुप्रजाः ।
आनुकूल्येन धर्मात्मा त्यक्त्वा सुखमनुत्तमम् ॥ ४४ ॥

अनुगच्छति काकुत्स्थं भ्रातरं पालयन्वने ।
सिंहस्कन्धो महाबाहुर्मनस्वी प्रियदर्शनः ॥ ४५ ॥

पितृवद्वर्तते रामे मातृवन्मां समाचरन् ।
ह्रियमाणां तदा वीरो न तु मां वेद लक्ष्मणः ॥ ४६ ॥

वृद्धोपसेवी लक्ष्मीवाञ्शक्तो न बहुभाषिता ।
राजपुत्रः प्रियश्रेष्ठः सदृशः श्वशुरस्य मे ॥ ४७ ॥

मत्तः प्रियतरो नित्यं भ्राता रामस्य लक्ष्मणः ।
नियुक्तो धुरि यस्यां तु तामुद्वहति वीर्यवान् ॥ ४८ ॥

यं दृष्ट्वा राघवो नैव वृद्धमार्यमनुस्मरत् ।
स ममार्थाय कुशलं वक्तव्यो वचनान्मम ।
मृदुर्नित्यं शुचिर्दक्षः प्रियो रामस्य लक्ष्मणः ॥ ४९ ॥

इदं ब्रूयाश्च मे नाथं शूरं रामं पुनः पुनः ।
जीवितं धारयिष्यामि मासं दशरथात्मज ।
ऊर्ध्वं मासान्न जीवेयं सत्येनाहं ब्रवीमि ते ॥ ५० ॥

रावणेनोपरुद्धां मां निकृत्या पापकर्मणा ।
त्रातुमर्हसि वीर त्वं पातालादिव कौशिकीम् ॥ ५१ ॥

ततो वस्त्रगतं मुक्त्वा दिव्यं चूडामणिं शुभम् ।
प्रदेयो राघवायेति सीता हनुमते ददौ ॥ ५२ ॥

प्रतिगृह्य ततो वीरो मणिरत्नमनुत्तमम् ।
अङ्गुल्या योजयामास न ह्यस्या प्राभवद्भुजः ॥ ५३ ॥

मणिरत्नं कपिवरः प्रतिगृह्याभिवाद्य च ।
सीतां प्रदक्षिणं कृत्वा प्रणतः पार्श्वतः स्थितः ॥ ५४ ॥

हर्षेण महता युक्तः सीतादर्शनजेन सः ।

हृदयेन गतो रामं शरीरेण तु विष्ठितः ॥५५॥

मणिवरमुपगृह्य तं महार्हं
जनकनृपात्मजया धृतं प्रभावात् ।
गिरिवरपवनावधूतमुक्तः
सुखितमनाः प्रतिसङ्क्रमं प्रपेदे ॥५६॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com